संबंधितोक्ताविनिवेयेद्दृष्टांतरमाह प्रतीतिनिनवृत्तिसामान्यादाविति शेषः समवायेनवृत्तेः प्रतियोगीतावच्छेदकीभूत
समवायेनसंबंधत्वस्यतादृशेतितादृशेनप्रतियोगितावच्छेदकसंबंधेनस्वसंबंधिघटाधिकरणेतदवृत्तितदभाववत्वाभिधा
नेचेत्यर्थः तथासतिसत्तासमवायाप्रवृत्तित्वस्यतदभावेसत्वेनोक्ताव्याप्तिपरिहारसंभवादितिभावः व्यधिकरणसंबंधेने
तिव्यधिकरणसंबंधेनसंयोगादिनागुणाद्यभावप्रतियोगितायांतेनसंबंधेनगुणादिसंवृत्त्याधिकरणप्रसिद्धाव्याप्तिरित्य
र्थः इदमुपलक्षणंप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिमत्यपिकालिकादिसंबंधेनाभाववृत्त्याप्रतियोगीताविशेषण
पाभावत्वावच्छेदकसंबंधेनवृत्तिरवश्यंवाच्यातथाचावृत्तिविशेषसंबंधेनसत्ताद्यभावस्याप्यः सत्तादिरूपाभावत्वेनप्रतियो
गित्वासंग्रहोपिदृष्टव्यसत्ताद्यभावसंबंधाधिकरणेसामान्यादौसमवायादिरूपतादृशसंबंधेनवृत्तेरप्रसिद्धेः वक्ष्यमाणरी

त्येति यादृशसंबंधसामान्ये एकदेशकालावच्छिन्नयदभावाधिकरणानुयोगीकत्वस्य यद्रूपविशिष्टप्रतियोगिकत्वं
स्यस्य च यद्योर्व्यतिरेकस्तद्रूपवत्त्वेन तादृशसंबंधेन तदभावप्रतियोगीत्वमिति निष्कर्षार्थः न च व्याप्यवृत्तेरवच्छेदकानभ्यु
पगमे एकदेशकालावच्छिन्नाभावाधिकरणत्वाप्रसिध्या नद्यादितोभयाभावाप्रसिद्धिरिति वाच्यम् एकदेशकाला
वच्छिन्नयदभावाधिकरणानुयोगिकत्वस्याने यदधिकरणनिष्ठाभावाधिकरणतायां प्रघदेशकालानवच्छिन्नत्वावच्छि
न्नतोभयाभाववत्तद्देशकालानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्तन्नदधिकरणानुयोगिकत्वद्वयं निवेशनीयमुभयस्य प्रति
योगिकत्वेनाद्विन्नावच्छिन्नाभावनिवेशनसार्थक्यस्यात् न चैवमपि समवायैकत्वनये समवायेन द्रव्यत्वाभावप्रतियोगी
त्वासंग्रहः प्रतियोगित्वासंग्रहः प्रतियोगितावच्छेदकसंबंधावच्छिन्नाधिकरणताधर्मिकोभयाभावविरहात्वाधिकर
णभेदेनाधिकरणताभेदव्यवस्थापनतत्संग्रहे च अन्योन्याभावप्रतियोगीन्यव्याप्तिः तादात्म्यसंबंधेनाधिकरणताया अप्र
सिद्धेः संबंधिता च संबंध एवेति तद्धर्मिकोभयाभावविवक्षणे पूर्वोक्त एव दोष इति वाच्यं प्रतियोगितावच्छेदकसंबंधानि
रूपितानुयोगिताधर्मिकस्य यभाया प्रतियोगिकत्वविशिष्टसंबंधप्रतियोगिकत्वनिरूपकयदभावाधिकरणावृत्तित्वात्
भावस्य विवक्षया समवायैकत्वमतेऽपि प्रतिप्रसंगवारणाय द्रव्यत्वानादिनिष्ठद्रव्यत्वादिप्रतियोगिकत्वविशिष्टसमवायप्र
तियोगिकविलक्षणानुयोगीनत्तो गुणादिनिष्ठतदनुयोगिताभेदस्याभ्युपगमत्वेन प्रतीकारसंभवात् अधिकमग्रे वक्ष्या
मः अवृत्तिगगनादेस्तदभावनिष्ठप्रतियोगित्वेनोपेयद एव नन्तत्स्वीकारेन यस्य येन संबंधेनाधिकरणे यस्य येन संब
धेनानवच्छिन्नापकावच्छेदकावच्छिन्नावावृत्तित्वानडभयाद्वृत्तिः स्वप्रतियोगि धर्मः स्वाभिन्नत्वे सति तद्धर्मवत्त्वमेव तत्संबंधा
वच्छिन्नस्वनिष्ठानुयोगितानिरूपकत्वं तत् संबंधावच्छिन्नप्रतियोगीत्वमिति विवक्षणीये नादृशधर्मस्य चटनदभावा
त्यतरत्वादिकमेव अवृत्तिद्वयस्य परस्परप्रतियोगित्ववारणाय वृत्तिमन्निष्टत्वेन धर्मविशेषणीयः एवमपि गोत्वादेरस्व

ग॰ त्वादिप्रतियोगीताप्रसंगवत्तद्घटत्वादौ द्रव्यत्वाद्यभावप्रतियोगीत्वाप्रसंगतादवस्थ्यमेवतत्त्वाभावविरोधित्वनिवेशोवक्ष्यमाणा
दी॰ मतद्वत्त्वाभावत्वस्यत्रघटस्यैवप्रतियोगितानिवेशोनात्माश्रयः न च द्रव्यत्वाभावादेर्घटत्वादिप्रतियोगिकत्वमिष्टमेवद्रव्यत्वा
द्यभाववतिघटत्वंनास्तीत्यादिप्रत्ययस्यद्रव्यत्वाभावादिविषयकत्वेष्टानिविरहाद्घटत्वंद्रव्यत्वाभावप्रतियोगीतिव्यवहा
15 रस्यसमनियताभावैक्यमतेमतेद्रव्यत्वाभावद्रव्यसमवेतत्वविशिष्टाभावादीनामभेदवादीनामिवान्यमतेपीष्टएवघटत्वे
नघटत्वंद्रव्यत्वाभावप्रतियोगि इत्यादिव्यवहारोपि अधिकरणस्वरूपाभाववादिनांप्रभाकराणामिवास्माकमपीष्टएवएवंगो
त्वादेस्स्वप्रतियोगीकत्वापत्तिमपिद्योतितविरहः घटेघटोगोत्वादिकंनास्तीतिप्रतीतेरसत्वादिविषयतायाइष्टत्वात् गोत्व
मस्त्वत्वप्रतियोगीइत्याव्यवहारोघटत्वप्रतियोगीत्यादिव्यवहारस्याधिकरणव्यक्तिसाधारणधर्मस्वरूपाभाववादिभिरिष्यत
एवेतिवाच्यंएवंसतिसर्वत्रविरुद्धधर्मैरेवाभावप्रत्ययोपपत्तावतिरिक्ताभावासिद्धिप्रसंगात् एवंविरोधिताघटकोभययामा
वादावपिप्रतियोगितान्तरनिवेशोदनयस्याचेतिध्येयंतत्वावच्छेदकेतिप्रतियोगितावच्छेदकेत्यर्थः अप्रसक्तातिप्रसक्तोइ
तिघटाद्यन्योन्याभावाद्यभावस्यतत्प्रतियोगितावच्छेदकघटत्वादिरूपत्वादितिभावः ननुनेदंप्रतियोगीत्वपदव्याख्यायांनिवे
चनंकिंतुव्याप्तिलक्षणप्रविष्टोपाधित्वघटकव्यापकतानिविष्टप्रतियोगितास्वरूपनिरूपणमेवतादृशप्रतियोगीतायाश्च
भेदप्रतियोगीसाधारणाविरहेपिनक्षतिः तावतापिव्याप्तिलक्षणस्यनिर्दोषत्वादित्यतआहप्रकृतोपयोगीतिअत्रयंतत्पदवैय
र्थ्यमितिधूमवान्वह्नेरित्यादौअयोगोलकान्यत्वादिरूपस्योपाधेःसाध्यवद्विशिष्टभेदप्रतियोगीतयाव्यापकत्वानुपपत्तिरितित
ह्यादरत्राप्येवासंतत्पदोपादानंयदिचभावाभावत्वरूपमन्योन्याभावप्रतियोगीव्यावृत्तप्रतियोगीत्वमुपाधित्वघटकव्यापकता
शरीरेनिवेश्यतेनतदासाध्यवद्विशिष्टोपाधिभेदमादायदोषस्यानवकाशात्तद्वैयर्थ्यमितिभावः ननुसाध्यवद्विशिष्टेसप्रागभावप्रति
योगीनघटादिरूपनदिरूपाधितानिर्वहामासंतत्पदोपादानंतस्यापितद्व्याप्तासाध्याभावरूपत्वादित्यतआहसर्वत्रेतिव्यभिचारिणीति ३

शेषः नित्यस्य व्यभिचारनिरूपकाधिकरणभेदादेः ह्रदत्वाद्यवच्छिन्नाभावप्रतियोगितामादाय असंभवस्य वारणार्थं प्रतियो
गितानवच्छेदकरूपावच्छिन्नत्वविवक्षया आवश्यकत्वेनार्द्रेंधनादेर्धनादेरपि धूमादिप्रतियोगितानवच्छेदकार्द्रेंधनायो
गोलकभेदान्यतरत्वादिना उपाधित्वसंभवइत्याशयेनाह नित्यसाधारणेति न च ध्वंसप्रागभावादीनां सामान्यधर्मेण प्रतियो
गितावच्छेदकइति साध्यवन्निष्ठध्वंसप्रागभावादिरूपायावप्रतियोगितावच्छेदकं नार्द्रेंधनत्वमिति नित्यसाधारणधर्मे०
पर्य्यनितावधानवधावनमफलमिति वाच्यं स्वसमानाधिकरणार्द्रेंधनध्वंसासमानकालीनतत्प्रागभावानां तादृशप्राग
भावासमानकालीनतद्ध्वंसानामार्द्रेंधनत्वस्यैव प्रतियोगितावच्छेदकत्वात् अन्यथा ध्वंसप्रागभावयोरन्यतराभावविर
हत्वमेतेनाहदृशाध्वंसप्रागभावाधिकरणे अत्रेदानीमार्द्रेंधनं नास्तीत्यादिप्रत्ययाऽउपपत्तेः वस्तुतस्तु यत्तद्रूपवान्नवन्हीरि
त्यादावेतदार्द्रेंधनादिव्यक्तीनां नोपाधिता संभवति तत्तद्व्यक्तीत्वादेः साध्यवन्निष्ठध्वंसादिप्रतियोगितावच्छेदकत्वादित्या
शंकया नित्यस्वेशानेन तत्तद्व्यक्तीनां व्याप्तिलक्षणप्रवेशोपेनदानिरस्तत्वान्नादृशोपाधीनामपि व्यापकरूपेणोपाधित
याव्याप्तिलक्षणप्रवेशएवेति नित्यासाधारणरूपावच्छिन्नस्याचेत्यभिहितं नित्यसाधारणयं वाचैतदेशनिष्ठध्वंसाद्यप्रति
योगिसाधारणधार्थकं तेनार्द्रेंधनत्वादेरपि संग्रहात्तत्तल्लनेतिध्येयं उपाधित्वसंभवादिति तथा चार्द्रेंधनत्वाद्यवच्छिन्नस्य
प्रकृतेऽनुपाधित्वाद् उपपत्तावपि न व्याप्तिलक्षणातिप्रसंग इति भावः इतरथा भेदप्रतियोगितासाधारणरूपावच्छिन्नप्रति०
योगितापालक्षणघटकत्वे भेदप्रतियोगीतेनिश्रप्रोगोलकभेदादेर्भेदप्रतियोगीत्यर्थः अथ यो गोलकभेदादेः साध्य
वन्निष्ठभेदप्रतियोगितयाऽनुपाधित्वे अयोगोलकभेदधूमवदन्यतरत्वाद्यवच्छिन्नस्योपाधितासंभवाव्याप्तिलक्षणानति०
प्रसक्तिर्निर्वहति नाहि ताहृशान्यतरत्वावच्छिन्ने धूमवति तदवच्छिन्नभेदो वर्तते येन भेदप्रतियोगितामादाय तदवच्छिन्न
स्योपाधित्वं व्याहन्येतेन न च जन्यं पृथिवीत्वादित्यादौ परमाणुभेदादेर्जन्यनिष्ठभेदप्रतियोगित्वेन साध्यव्यापकतया जन्यपर

माणुभेदान्यतरत्वावच्छिन्नस्य परमाणुसाधारणत्वेन साधनव्यापकतया उपाधित्वं न संभवतीति तत्रानौपाधिकत्ववारकतया
अत्यंतपदसार्थक्यमितिवाच्यं साधनाव्यापकतायां अत्यंताभावनिवेशस्य निष्प्रयोजनकत्वापाताद् हृद्भान्यतरत्वावच्छिन्नस्य परमा
णुभिन्नावच्छिन्नस्य च साधनप्रधिकरणपरमाणुनिष्ठभेदप्रतियोगित्वेन साधनाव्यापकतयोपाधित्वसंभवात् एवं घटाभावभि
न्नप्रमेयत्वादित्यादौ घटाभावभिन्नत्वावच्छिन्नस्यापि साध्यवन्निष्ठघटाभावरूपघटाद्यभावनिष्ठस्वभेदप्रतियोगितया साध्यव्या
पकत्वासंभवेनानौपाधिकत्वापत्त्या तद्वारकतयात्यंतपदसाधकत्वं तत्पददानेन घटाभावभेदे देवोपाधित्वसंभवादिति तत्र घटाभा
वभेदात्यंताभावस्यापि साध्यवन्निष्ठघटाभावमात्रवृत्तित्वेन तत्त्वल्पयकतया घटाभावरूपतया अत्यंतपदोपादानेऽपि तत्रोपाधेर्दौर्ले
भ्यात् नचात्यंतपददानादत्यंताभावत्वनिरूपकप्रतियोगित्वालाभादुक्तस्थले घटाभावभिन्नस्य घटाभावात्मकस्वभेदत्वनि
रूपकप्रतियोगीत्वविरहादुपाधित्वं संभवत्येवेतिवाच्यं घटाभावभिन्नं पटत्वादित्यादावुक्तक्रमेण साध्यव्यापकस्य घटाभावभिन्न
स्य घटाभावात्मकस्वभेदत्वनिरूपकप्रतियोगीत्वपि अत्यंताभावत्वनिरूपकप्रतियोगीत्वविरहादुपाधित्वं संभवत्येवेतिवाच्यं
साध्येन समानाधिकरणघटाभावरूपस्वभेदप्रतियोगीतयोपाधिनापत्त्या साधनाव्यापकत्वदलेपि अत्यंताभावत्वनिरूपकप्र
तियोगीत्वनिवेशस्यावश्यकत्वे उक्तस्थले प्रमेयत्वादिरूपसाधनव्यापकतयानस्योपाधित्वासंभवात् विवक्षांतरेण घटभेद
भावस्योपाधित्वोपपादनेन घटाभावभिन्नस्यापि तदुपपादनसंभवेनात्यंतपदवैयर्थ्यस्याकात्त्वादिति चेन्न अखंडनित्यायोगोलक
भेदरूपोपाधेः साध्यवति कथंचिदपि नात्यंताभावः विशिष्टाभावस्य विशेष्यविशेषणसंबंधप्रतियोगीकत्वमतावलंबमानद्वो
नच्छूस्यादिप्रतितेधपरंपरासंबंधेनादित्वाघभावएव विषयइतिमताश्चचर्णां ज्ञावा तज्ज्यावृत्तिधर्मानविच्छिन्नत्वं वा प्रतियोगि
तायां विशेषणं तथा चाप्रतियोगित्वगर्भमेव व्यापकत्वं वाच्यं तत्र प्रतियोगितानवच्छेदकावच्छिन्नत्वरूपं प्रयुक्तानापि पदित
दत्येनेनानवच्छेदकावच्छिन्नत्वनिवेशप्रागनिर्भरोदर्शितः एवं चायोगोलकभिन्नत्वसाध्यवदन्यतरत्वावच्छिन्नस्योपाधित्वं उ

रूपयादमेवताद्रूप्यसाध्यवत्साध्यवन्निष्ठात्यन्ताभावप्रतियोगित्वादयोरुपलक्षकभेदादेस्तत्ताद्रूप्याभेदप्रतियोगित्वादित्यत्रत्वं
त्पदसार्थक्यात् नत्वेवमतिनित्यसंसर्गाभाववत्त्वद्रूपात्यन्ताभावत्वघटकध्वंसादिवारकतिनित्यत्वाशस्यानतिप्रयोजकत्वे
मेवेत्याशंकायांनित्यत्वांशेपेनानिवेशनेएवकेवलसंसर्गाभावत्वलाभायैवात्यन्तत्वपदमितिदर्शयति संसर्गाभावेतित्व
स्यात्यंतपदस्यअन्योन्याभावप्रतियोग्यव्याप्तिपरिहरणेमाह विरहपदरूपेति ज्ञातिजनितत्वेनअभावाभिलप्यज्ञानेनत्व
तिकबंधकज्ञानविषयार्थकत्वादित्यर्थः अभावान्यत्वउपलक्षणंज्ञानप्रभृतानामेवविरहपदार्थघटकत्वबोध्येतेनना
भावपदवैयर्थ्यं एवंचतदभावग्रहप्रतिबंधकग्रहविषयत्वमेवतदभावप्रतियोगित्वमितिफलितंएतज्ज्ञानान्योन्याभाव
प्रतियोगिसाधारण्ययैवेत्याह प्रतिबध्नातीतिप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिप्रकारकनिश्चयस्याभावधीप्रति
बंधकत्वादितिभावः प्रतिबंधकत्वोपदर्शिकारणीभूताभावप्रतित्वेनदाप्रतियोगित्वांतरप्रवेशमदनवस्थेत्यतआह प्रतिबं
धकत्वंचेति अत्रप्रतियोगित्वालक्षणेअभावप्रतियोगिमतोज्ञानयोरपिभिन्नकालावच्छेदेनैकत्रात्मनिएकत्वेणाव
च्छेदेनचविभिन्नात्मनिवर्तमानत्वादेककालावच्छेदेनेतिएकत्रेतिचकालपदरूपणमरंतेनस्थूलकालावच्छेदेनतयोरेक
धिकरणवृत्तित्वेपिनक्षतिः अत्रैकत्रेत्यनतिप्रयोजनकंअभावज्ञानाधिकरणत्वेन वच्छेदेनतच्छयात्मनिष्ठप्रतियोगि
ज्ञानासंग्रहेपितज्ज्ञानाधिकरणलक्षणवृत्तियत्किंचित्प्रतियोगिज्ञानव्यक्तिमादायलक्षणगमनसंभवात् नचकालमात्रस्ये
वपरमेस्तित्वाज्ञावात् ज्ञानाधिकरणक्षणवृत्तिक्षणवृत्तितया भावज्ञानाधिकरणलक्षणवृत्तिज्ञानप्रसिद्धिरितिवाच्यंअभावज्ञा
नावच्छेदकलक्षणावच्छिन्नवृत्तिकात्यन्त रूपस्यएककालावच्छेदेनावर्तमानत्वस्यानिवेशेनितस्यभगावज्ञानस्यकालविशे
षेणानवच्छिन्नतयासर्वत्रप्रतियोगिज्ञाननाहशक्षणवृत्तिकत्वानियमात् घटाभावज्ञानानवच्छेदकलक्षणावच्छिन्नघटादि
ज्ञानव्यक्तिमाश्रित्यातिप्रसंगात्क्षणकलक्षणावच्छेदेनघटाद्यभावज्ञानाधिकरणवृत्तिघटादिज्ञानस्यापिसत्त्वेनातिप्रसंगवदभा

ग॰
दू॰
17

वपदस्य स्वाभावपरतयैव व्याख्येयः तच्चैवं सति पक्षतावच्छिन्नत्वं परित्यज्य पक्षाधिकरणवृत्तित्वस्य निवेशेनापि निर्वाहसंभ
वः पक्षवृत्त्यभावीयघटाभावज्ञानव्यधिकरणमप्रवृत्त्यान्तरीयघटादि ज्ञानमादाय यदोषघटाभावप्रतियोगित्वेऽपि येति नेरिवाच्यं
अभावज्ञानस्य हि घटाद्यभावज्ञानत्वेनैव निवेशो न तु तत्तद्व्यक्तित्वादिना तथा च तद्घटाभावज्ञानानधिकरणवृत्तिघटादिज्ञानमे
वकर्त्तुं सर्वेषामेवात्मनां कदाचिद्घटाभावज्ञानवत्त्वात् इत्येकदेशावच्छिन्नत्वानिवेशस्यावश्यकत्वात् तदधिकरणवृत्तित्व
शरीरे प्रतियोगितायां तदधिकरणवृत्तित्वत्वावच्छिन्नत्वनिवेशनाम फलेन तदधिकरणवृत्तित्वप्रतियोगिताकाभावनिवेशेना
पि--पपन्ने घटाभावज्ञानवत्वृत्तिपटादिज्ञानेन तद्वृत्तित्वप्रतियोगिकतद्विशेषाभावसत्त्वेऽपि स्वाभावस्य निवेशनीयतया प्रति
प्रसंगानवकाशात् तथा च घटादिज्ञाने घटाभावज्ञानानधिकरणवृत्तित्वसत्त्वेऽपि तत्प्रतियोगिताकाभावसौलभ्यात् घटादेः
स्वाभावप्रतियोगित्वमुपपद्यतादेवेति वाच्यं तदधिकरणवृत्तित्वनिष्ठप्रतियोगितायाः प्रकाशप्रतियोगितायाः संबंधतया निवे
श नया प्रतियोगितायाः पत्रप्रतियोगसंसर्गतया प्रवेशात्तत्र प्रतियोगिप्रकारीभूतधर्मावच्छिन्नत्वभानस्यावश्यकतया तद
धिकरणवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्यैव प्रतिबंधकतापत्तया पक्षत्वेनावच्छिन्नत्वानिवेशे उक्तानुपपत्तेरसंगा
त् पत्वे वयं तु अन्योन्याभावप्रतियोगितावच्छेदकेति प्रसक्तिं निराकर्तुं गाहाभावपदस्य चेति स्वाभावपरत्वादतिन तथा च स्वीयो
गितावच्छेदकेति प्रसक्तिं निराकर्तुं गाहाभावपदस्य चेति स्वाभावपरत्वादतिन तथा च स्वीयो योऽभावः स्वनिष्ठतद्विरहत्वमेव स्व
स्य तदभावप्रतियोगित्वं घटादिन्योन्याभावो न घटत्वाभाववृत्तित्व घटत्वादिनिष्ठं तद्विरहत्वं न तु प्रतियोगित्वमिति भावः घटप
वनदभावप्रतियोगित्वादौ अभावपदे लक्षणया घटादिरूपसमभिव्याहृतपदार्थविशेषिताभावपरे प्रतियोगीपदे ज्ञाने
प्रतिबंधकज्ञानविषयः यत्त्वावच्छिन्नार्थकं तद्वेकदेशज्ञाने चाभावीयविषयकत्वान्वयः इति स्वात्वानुगमेऽपि न प्रतियोगिपदसंक्रा
न्त्यप्रसंगो न न वा भावपदार्थानन्तत्वया प्रतीतिरिति ध्येयं पं संबंधविशेषावच्छिन्नत्वस्य व्यापकताघटकप्रतियोगितायामवश्यं

निवेशनीयतया भेदप्रतियोगितामादाय ोक्तदोषासंभवेन संसर्गाभावत्वनिवेशवैयर्थ्यमित्यत्र तत्पदं संबंधविशेषावच्छि
न्नत्वलाभार्थकं तथैवन्याख्येयं तथा च प्रकृते तादृशयोगित्वप्रतियोगितामात्रस्थलेप्यत्वेपि न क्षतिरित्याहवस्तुतस्त्वित्यादिना य
कसंबंधावच्छिन्नायाइतितथा च साध्यवन्निष्ठाभावप्रतियोगिता सामान्यानवच्छेदकत्वनिवेशप्रतियोगितावच्छेदकमात्रं
स्यैव साध्यवल्लिष्ठयत्किंचित्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वं यादृशप्रतियोगिता सामान्यानवच्छेदक साधनव
न्निष्ठाभावप्रतियोगितावच्छेदकाप्रसिद्धिः नचायोगोलकभेदत्वादिकमेव न तथा धूमादिमति संयोगादिव्यधिकरणसंबंधाव
च्छिन्नायोगोलकभेदाभावसत्वेपि तत्प्रतियोगित्वायालाघवेन शुद्धभेदत्वादेरवच्छेदकत्वोपगमादिति वाच्यं विषयतासं
बंधेन कालीकसंबंधेनवायोगोलकभेदाभावस्यप्रतियोगितायामेवायोगोलकभेदत्वादेरवच्छेदकतातादृशस्यसा
ध्यवल्लिष्ठाभावप्रतियोगितानवच्छेदकत्वासंभवात् अयोगोलकभेदाविषयकेभेदतरविषयकज्ञानेविषयितासंबंधेन
भेदत्वादृशसामान्यधर्मावच्छिन्नाभावसंभवेपि तत्साधारणतादृशसंबंधावच्छिन्नायोगोलकभेदाय भावस्य भेदसामान्या
नधिकरणदेशाप्रसिद्धा कालिकसंबंधावच्छिन्नभेदत्वावच्छिन्नाभावासंभवेमायोगोलकभेदानधिकरणवोलकाधि
च्छेदेन कालहत्वेः कालिसंबंधनायोगोलभेदाव भावस्य च प्रतियोगितायां शुद्धभेदत्वादेवावच्छेदकत्वायोगात् यदि च
यत्किंचित्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वविवेशनायोगोलकभेदत्वादेस्तथात्वमुपपादयते तदा वह्निमान् ध
मादित्यादौ वह्न्यादिमन्निष्ठसंयोगसमवायदैशिकाविशेषणतासंबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकधूमादिमल्लि
ष्ठसमवायसंयोगकालिकसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकवह्नित्वद्रव्यत्वत्वहृदभेदत्वाद्यवच्छिन्नास्योपाधि
तापत्तिरितिभावः यसंबंधावच्छिन्नाणाइतितथा च संयोगादिसंबंधावच्छिन्नवह्न्यादिमन्निष्ठाभावप्रतियोगितानवच्छे
दकवह्नित्वादेः साधनवन्निष्ठतत्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वासंभवात् धूमादिमन्निष्ठविशेषणताविशेषादिसं

गं
दू
18

बंधावच्छिन्नाभावप्रतियोगीतानवच्छेदकायोगोलकायोगोलभेदत्वादेस्तत्वमादिमन्निष्ठताद्दृशसंबंधावच्छिन्नप्रतियोगी
तावच्छेदकत्वाच्च नकाश्चिद्विशेष इतिभावः संसर्गाभावत्वमनुपादेयमेवेति अयोगोलकभेदात्वाद्दृशंदप्रतियोगितावच्छेदकाव
पिविशेषसंबंधादेवादिनिरुक्तोयाधितावच्छेदकत्वस्यतत्रात्वतनत्वादिति भावः सचास्वरसत्त्वव्यधिकरणसंबंधेनेतितत्याच
पाद्दृशाव्यधिकरणसंबंधेनेतितत्याचपाद्दृशाव्यधिकरणसंबंधेनसंयोगादिनायस्यद्रव्यविशेषादेःकस्चिदपिकस्यविध्वमो
नजानत्तस्यताद्दृशसंबंधावच्छिन्नाभावप्रतियोगित्वानुपपत्तिः प्रतियोगितावच्छेदकसंबंधेनैवप्रतियोगिप्रकारकज्ञान
स्याभावधीविरोधित्वात्ताद्दृशाभावधीप्रतिबंधकज्ञानस्यैवाप्रसिद्धेः यद्यपिसमानधर्मिकयोरेवाभावप्रतियोगिमत्ताज्ञानयोः
प्रतिबंध्यप्रतिबंधकभाव इतिसमानाधिकरणसंबंधावच्छिन्नाभावस्थलेपिविरोधिनोरभावप्रतियोगिज्ञानयोरेकत्रैवसत्व
मत्वनियं इतिताद्दृशाभावस्यतत्प्रतियोगिनोवाभ्रमोनकदाचिदपिप्रसिद्धस्तदभावप्रतियोगित्वाव्याप्ते नसंभवस्तस्त
थापिसमानविशेष्यतासमानविशेष्यताप्रत्यासत्त्याप्रतिबध्यप्रतिबंधकभावोपगमेभिन्नधर्मिकज्ञानस्यापिप्रतिबंधकता
वच्छेदकाक्रांततयाताद्दृशभ्रमात्मकज्ञानमादायलक्षणसमन्वयः संभवतीतिव्यधिकरणसंबंधावच्छिन्नाभावानुधावन
तत्प्रतिबंधत्वेनकारणीभूताभावप्रतियोगित्वमपित्वेककालावच्छेदेनैकत्रावर्तमानत्वमितिप्रागेवोक्तएवंचयाद्दृशव्यधि
करणसंबंधेनयस्यप्रतियोगिनोभ्रमोऽप्रसिद्धस्ताद्दृशसंबंधावच्छिन्नतदभावज्ञानासमानकालीनतत्प्रतियोगिविषयकसं
बंधानवगाहिप्रमामादायैवलक्षणसंगतिः संभवतीत्यतोदूषणांतरमाहस्वाभावेतिसंबंधस्यनियमचादिनतयावोरवाद
ह स्वाभावज्ञानेनिलवोरित्यस्यस्वाभावज्ञानप्रतिबंधकज्ञानविषयत्वापेक्षमित्यादिः सर्वत्रसंभवितत्वादितिसर्वत्रप्रतियोगि
तास्वरूपत्वसंभवादित्यर्थः तदभावज्ञानविषयोदाणिनेप्रतिप्रसंगस्यस्वांशेतिवेशेनैवायोगादितिभावः तन्नुतथैवास्ताकिमत
आहास्वाभावेत्यत्रेतिस्वाभावोत्पादावितिपाठेयथाश्रुतविरहनिवेशपक्षेऽभावविरहेतत्स्यपरिग्रहः षष्ठ्यार्थप्रतियोगिताया

इतिस्वस्याभावः स्वाभावइति इष्टार्थं प्रतियोगित्वातिरिक्तानतिप्रसक्तसंबंधस्यैवचत्वादितिभावः तत्रस्वरूपसंबंधस्यैवेतित्र
न्यथाप्रात्माश्रयादितिभाव यद्यपिस्वाभावेत्यत्रप्रतियोगीतायाःसंबंधविषयानिवेशोसंबंधज्ञानस्याविशिष्टबुध्यहेतुतया
स्वाभावेत्यत्रस्वाभावाभावत्वरूपप्रतियोगितानिवेशोपितज्ज्ञानात्पूर्वंनतज्ज्ञानापेक्षेतिनउक्तयत्नात्तथापिविशिष्टसंबंधेसंबं
धस्यापिचटकतयासंबंधविषयाभासमानस्यतस्यशरीरेपितस्यसंबंधविषयाधानंतादृशरोत्यभावांतर्गतमपिसंबंधविषया
तज्ज्ञानमितिविषयमानानवस्थाइवदैवतत्यात्वौचित्यात् प्रतियोगितात्वौचित्यात् प्रकारांतरेणप्रतियोगिताप्रवेशमाह
अभावत्वेति अभावत्वं इत्यादि प्रतियोगिकभेदवत्वप्रतिबंधकत्वेपकत्रवर्तमानत्वप्रतियोगिकाभावइतिभावः नत्वभावादि
व्यवहारगोचरत्वमेवाभावत्वादिकंनतुप्रतियोगिताघटितमितिरुक्तरूपमित्यतआहतथाविधेतिविनाप्रतियोगितामिमिप्र
तियोगीनांतर्भावमंतरेणेत्यर्थः तथाविधव्यवहारगोचरत्वं अभावादिशब्दप्रतिपाद्यत्वं तत्पदशक्तिविषयत्वरूपेवाउभयथा
पिजन्यताघटितंप्रतिपाद्यत्वेस्यतत् जन्यप्रतिपत्तिविषयत्वरूपत्वात् तत्पदशक्तेश्चतत् पदजन्यबोधविषयत्वप्रकारकभ
गवदिच्छारूपत्वात् जन्यताचव्याप्तिघटितानतस्याश्चप्रतियोगीताघटितत्वादितिभावः एवंचप्रतियोगिताचरूपसंबंधवि
शेषइतिएवमतएवमणिकारस्यनिर्भरइतिस्वाचितंइदमवधेयंघटोनास्तीत्यादिबुद्धावभावांशेप्रतियोगिनःप्रकारतया
भानात्मरणेभावादेःकारणत्वेप्रतियोगिताअवच्छेदकत्वाच्च अभावनिष्ठप्रतियोगीनिरूपितोऽनुयोगिताख्यस्वरूपसंब
धोवश्यमंगीकार्यः प्रतियोगीन्यभावविशिष्टबुद्ध्यात्मकोभावोयोघटइत्यादिप्रत्ययस्त्वनानुभवसिद्धइसभावोयमसयो
गीताख्यस्वरूपसंबंधोमानभावःप्रतियोगिव्यवहारः स्वानुयोगितानिरूपकत्वमेवावालंबनेऽधंसस्यप्रतियोगिनिष्ठमन्या
सत्वाप्रतियोगिजन्यत्वानुरोधेनतस्यप्रतियोगिनिष्ठसंबंधोपगमस्यावश्यकइतिचेदस्तुमतथाअभावांतरस्यतादृशसंबंधो
निषुमाणकएवन चजन्यत्वस्ययत्रकार्यतावच्छेदकतातत्रप्रागभावामिश्रानुयोगितानिरूपकत्वापेक्षया प्रतियोगित्व

गं० दी०

19

संबंधेनप्रागभाववत्त्वस्यतथात्वेलाघवात्प्रागभावस्थापितादृशसंबंधःसिद्ध्यतीतिवाच्यं तत्रनिरूपकतासंबंधेनानुयोगिताविशि
शेषरूपप्रागभावत्वस्यैवावच्छेदकत्वोपगमात् अन्यथाप्रागभावनिष्ठात्यन्ताभावादिभेदस्याधिकरणस्वरूपतामतेजन्यत्वस्या
त्यंताभावादिसाधारण्यापत्तेर्गौरवाच्चेतियत्साध्यस्येत्यत्रकर्मधारयसमासेव्याप्त्यैहेतुनिष्ठत्वानुपपत्तिरितिषष्ठीतत्पुरुषमवलं
व्याचष्टेयत्समानाधिकरणेतितथाहीत्यादिनादर्शितंउभयविधानैयायिकत्वस्यसौयाधाचतिप्रसंगादुरतियत्समानाधि
करणसंताभावेत्यादिनाअत्यन्ततत्पदानिमूलेतत्पदमलीकपातानिनत्रविवदितार्थकानिसंबंधविशेषावच्छिन्नत्वेनप्रतियो
गितायाअनेविशेषणापनयाव्यहूत्यभावात्नोक्तदोषइतिअत्रैपनायोगोलाकान्यात्वादिनाधूमादिरूपसाध्यवन्निष्ठनतद्व
त्तित्वोभयत्वावच्छिन्नप्रतियोगितावत्त्वेपितत्त्वस्यसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वात्तादृशधर्मस्यमहानसीय
वह्न्यादिरूपयत्किंचित्साधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेपिसाधनवन्निष्ठाभावयोगितावच्छेदकत्वसामान्याभाव
वत्त्वाभावादितिभावः एकसंबंधावच्छिन्नत्वमितिसाधनसमानाधिकरणाभावाप्रपघसंबंधावच्छिन्नप्रतियोगितावच्छेदका
त्वेयस्यतस्यसाध्यवन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वेसाध्यवनिष्ठाभावाप्रपघसंबंधावच्छिन्नप्रति
योगितानवच्छेदकत्वेयस्यसाधनवन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमित्येवंविव रणीयमित्यर्थ
विशेषणाविशेषसंबंधमात्रनिवेशेनैवसामञ्जस्येसंबंधान्तरनिवेशानुपफलमित्याशयेनाहविशेषणेनेतिप्रथमालक्षणो
संबंधविवक्षायाःफलमाहप्रतियोगितावच्छेदकमात्रस्यैवानुमात्रपदस्वलार्थकेनतथाचस्वतत्साधनसमानाधिकरणप्र
तियोगितावच्छेदकसामान्यस्यसाध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमितिसंबंधाविवक्षणेतिव्याप्तिःस्यादिति
भावः लकधर्मसमनियतरूपधर्मस्यसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसंभवाद्धर्ममात्रस्योपेक्ष्यप्रतियोगितावच्छेदक
धर्मोन्नमवरणेपपघापिकंवृत्रोवादिमत्वाद्दोपिविषयितासंबंधावच्छिन्नताद्दृशाभावप्रतियोगितावच्छेदकत्वसंभवात्तिचदत्वा

दिविशिष्टविषयकेपि कंबुग्रीवादिमत्वाय त्रकारकेत्वानादौतादृशिष्टस्वविषयतासंबंधावच्छिन्नाभावसत्वेनलक्षणत्वा
देस्तत्प्रतियोगित्वावच्छेदकत्वासंभवात् तथापिविषयिताव्यात्ययोगमनकत्वेनाभावप्रतियोगितावच्छेदकसंबंधकत्वान्ना
स्तीत्यभिप्रायेणदंअयोगोलकभेदवत्वादेस्त्वधूमवान्निष्ठकालिकादिसंबंधावच्छिन्नाभावप्रतियोगित्वावच्छेदकत्वबोधेहिन्नो॰
यलक्षणेसंबंधविषयवक्षाफलेदर्शयतिप्रकसंबंधेनेतितथाचयादृशयत्किंचित्संबंधावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियो॰
गितानवच्छेदकंमयतत्रसाधनसमानाधिकरणाभावप्रतियोगितासामान्यावच्छेदकत्वाभावोविवक्षितस्तदाऽसंभवास्यादिति
भावःयदिचसाधनसमानाधिकरणाभावीयत्किंचित्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वाभावोनिवेश्यतेउभयदत्रएवप्रति
योगितासामान्यंवातदापुनरतिव्याप्तिरेवेतिहृदयंउभयलक्षणएवसंबंधविवक्षणाव्यभिचारणएपतिव्याप्तिबाणप्रकारंदर्श
यतिव्यभिचारिणीत्विति तन्निष्ठाभावप्रतियोगितावच्छेदकमितितथाचसाधनयन्निष्ठाभावप्रतियोगितावच्छेदकेषुसाध्यव
न्निष्ठाभावप्रतियोगितानवच्छेदकेषुसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकेषुवायावत्सुसाध्यवत्वप्रकारकप्रमाविषय
त्वत्वातभावात्तत्रचसाध्यवन्निष्ठभावप्रतियोगितावच्छेदकत्वसाधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वयोरभावात्तत्र
लक्षणद्वयातिव्याप्तिरितिभावः अत्यंताभावघटितंतयावत्साधनाव्यापकाव्यापकसाध्यसामानाधिकरण्ययावत् साध्यव्या
पकव्यापककत्वयोरभावप्रतियोगितावच्छेदकसंबंधविशेषघटितत्वेनगुरुत्वयानदघटितमन्योन्याभावगर्भलक्षणद्वयमाह
वन्हिमानित्यत्रअन्योन्याभावलक्षणेपिप्रतियोगितावच्छेदकतयोरेकसंबंधावच्छिन्नत्वस्वविशेषणतास्वविशेषणावच्छिन्न
न्नस्वत्वानिवेशनसावकाशकंअन्यथाअयोगोलकादिनिष्ठयादेरपिधूमाघटकसाध्यवन्निष्ठास्वविषयितादिसंबंधेनसावच्छिन्न
भेदस्यप्रतियोगितावच्छेदकतयाप्रतिप्रसंगात अत्यंताभावघटितलक्षणेचतादृशासंबंधेनायोगोलकभेदत्वाद्यवच्छिन्नतान्
देर्योऽत्यंताभावस्तत्प्रतियोगितावच्छेदकतामादायातिप्रसंगेनसंभवतिविशेषणताविशेषसंबंधावच्छिन्नप्रतियोगितायां॰

ग॰ दृ॰

२०

तद्भेदत्वादेरेवावच्छेदकत्वसंभवेन ग... द्वयोर्गोलकभेदत्वादेरनवच्छेदकत्वादिति तत्र प्रतियोगितावच्छेदकतावच्छेदकसं
बंधानिवेशो नास्तीति तथा चान्योन्याभावगर्भव्याप्तौ लाघवानवकाशः तथापि गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते ऽन्योन्याभाव
गर्भलक्षणेपि प्रतियोगितावच्छेदकतावच्छेदकसंबंधनिवेशनमावश्यकं एवं भेदत्वादेर्विषयितादिसंबंधेन प्रतियोगितावच्छे
दकत्वे योर्गोलकभेदत्वादेर्नाप्रतियोगितानवच्छेदकत्वनिर्वाहः विशेषणतया माश्यापि विशिष्टानुयोगिकाभावानभ्युपगमादिदि
तादृशधर्मस्य साध्यव्यापकतावच्छेदकत्वनिर्वाहाय द्वितीये ऽन्यतमाभावघटितलक्षणे तन्निवेशनस्यावश्यकता सर्वैरेवेत्यभिप्राये
णेदं वस्तुतस्त्वित्यादिग्रंथकल्पितः पाठ इत्यपि वदंति यावद्व्यभिधाभिनद्व्यभिचारोऽभयत्रैव बहुव्रीहिधर्मनिरासायाव्याच
ष्टे यावंतो तेषामिति दूषितानामित्यत्र केन दोषेणेत्याकांक्षायामाह व्यतिकेवलान्वयिन्यव्याप्तेरिति तत्र साध्याव्यभिचारित्वमात्रे केवला
न्वयिन्यव्याप्तिः प्रसज्यते इत्यत एव दोषस्यार्थं कथं भविष्यतीत्याशंकायामाह स चेति केवलान्वयिन्यव्याप्तिश्चेत्यर्थः यथोक्तल
क्षणे यावंतः साध्याव्यभिचारिणस्तेषामव्यभिचारित्वरूपे केवलान्वयिसाध्यव्यतिरेकिणो व्यभिचारि एवं केवलान्वयिन स्वव्य
भिचार एवासिद्ध इति तदव्यभिचारित्वमपि तथेति साध्ये यस्याव्यभिचारितादृशावस्तुत्वे तेप्रसिद्धेरिति भावः कार्त्स्न्येन संबंध इत्य
त्र साधनसाध्यसाधनानुपसाधनसमानाधिकरणधर्मस्य कार्त्स्न्यविशेषणता पृष्ट्वा मूलकृता दूषिताः नानासाध्याश्रयतत्समा
नाधिकरणयोस्तद्विशेषणत्वपक्षयोश्चतोऽन्यतमाभगाय स्ववयंतो दूषयिष्यंतावंतर्भाव्य वितर्कयति कार्त्स्न्यमित्यादिना साधनस
मानाधिकरणस्य विवक्षितमिति शेषः सकलधूमसंबंधस्य प्रत्येकं वह्न्यावभावादित्यभिधानेन साध्यानुयोगिककृत्स्नसाधन
संबंधस्य व्याप्तितापक्षदूषणे मूलस्य तात्पर्यं प्रतियत तथा च कृत्स्नस्य साधनानुयोगिकसाध्यसंबंधस्यादूषणेन तस्य तन्नोपरिहर्तुं न
न तद्दूषयिष्यन् साधनस्य कार्त्स्न्यमंतर्भाव्य वितर्कयति आद्य इति प्रथमपक्षे मूलोक्तदूषणद्वयसंगमय्य ग्रंथिकादोषद्वयमा
ह अव्याप्तेश्चेति पृथिवीति च पृथिवीत्वेति च घटत्वपटत्वादिसकलधर्माधिकरणाप्रसिद्ध्या सकलतत्सामानाधिकरण्याप्रसिद्धि

रतः पृथिवीत्वमिति त्वदुपेत्य तज्ज्ञापकत्वात्तु सरणे पृथिवीत्वव्यापकत्वे पृथिवीनिष्ठान्योन्याभावप्रतियोगितावच्छेदक
त्वमस्तीति साधारणमिति नेन दूषणेन हेतुत्वेऽस्य दूने रपि सकलसाधनान्तर्गततयानद्धिकरणप्रसिद्ध्या नातिव्याप्तिप्रसक्तौ
रतो जातिपदं समवेतार्थके अत एव एकव्यक्तिसाधनकाव्याप्तिसहितदर्शिनातिव्याप्तेरेवाह न रः कृत्स्नधापने साध्यसंबधो
व्याप्तिरिति मन्तः द्वितीयं साध्येकान्तर्विशेषणपदं एकव्यक्तिके न तदभावादिसत्त्व एकव्यक्तिकपदं नाहशासाधनपरं नस्यसा
धनकान्त विशेषणपदं दूषणाय रत्वात्तथाच अत एवेत्यस्य तादृशाशङ्कादूषणपरत्वासंभवादेकव्यक्तिसाध्यकाव्याप्तिपरत
याव्याचष्टे अत एवेति न्यूनताभ्रमापसारयति समव्याप्तेऽपि चेति संख्यापरिमाणादौ संख्यादिसाध्यकपरिमाणादौ शाहृवा
मिति दूषणादौ साध्यत्वे सकलदधिकरणाप्रसिद्ध्या नातिव्याप्तिः अतः शाह साध्यकात्रयावन्नत्र गगनस्यैव सकलशाहादिकर
णत्वात्तृतीयचतुर्थयोरर्थाभिधानपूर्वकं दूषणमाह तृतीये त्वित्यादिना एकमात्रवृत्तिसाध्यके‥ वद्व्याप्रसिद्धेर्दोषस्त
तो यदाव न चतुर्थे चतुर्थे वह्निमान् सत्वादित्यादावतिव्याप्तिरपि नेत्रैव चतुर्थे यावत्साध्यसमानाधिकरणपदं नत्वमहा
नसत्त्वाद्यधिकरणप्रसिद्धा तदनवकाशादातो यथासंभवमिति धूमादावव्याप्तिरिति सकलवह्निमत्प्रत्येकं धूमस्या
वृत्तेर्वह्निसमानाधिकरणयावद्धर्माधिकरणाप्रसिद्धेरिति भावः सत्वादावपि सत्त्ववद्व्याप्यसाध्यात्पत्तेरुपपद्यते पंचमे यथाश्रुते
यावत्साधनाश्रयसंबंधः साध्ये लभ्येतेन तावता व्याप्तेः साधननिष्ठत्वानिर्वाह इति तन्निर्वाहाय तादृशा साध्यसमानाधिकरण
स्य प्रवेशनमर्थपरिष्कारः स्वपमधिकं दूषणमाह एकमात्रवृत्तिसाधन इति यावत्साधनाश्रयाप्रसिद्धेरिति भावः तथैव ग्रंथ
परिष्कारपूर्वकमेव अत्रापि यथाश्रुते तु हेतुन सामानाधिकरण्यसामानाधिकरण्यं साध्ये लभ्यते अतो व्याप्तेर्हेतुनिष्ठतासंपाद
नाय सामानाधिकरण्यसाधिकरणनिवेशनमेव परिष्कार इति बोध्यं न तु साधनसमानाधिकरणानां मिथ्योविरूपत्वनामि
काधिकरणाप्रसिद्धावपि तेषां प्रत्येकसामानाधिकरण्यमेव साध्ये निवेश्यमिति न मूलोक्तदोषावसर इत्यत आह नाहशानामि

ग॰
टू॰
21

तिसाधनसमानाधिकरणानामित्यर्थः नञ्चापि वह्न्यादिति साध्यतावच्छेदकेन तद्धर्मसमानाधिकरणवृत्तित्वं निवेश्यं न तु दोषो दृ
षणिनानाद्धर्मावच्छिन्नसाध्यके दंडिमान् दंडिसंयोगादित्यादौ ञ्चापि दंडादिव्याप्तौ साधनसामानाधिकरण्यानां सर्वेषां प्रत्येक
समानाधिकरणवृत्तित्वासंभवेनाव्याप्तिर्वा व्यासाधनसमानाधिकरणः सर्वेषामायाद्वृषासाध्यसामानाधिकरण्यलेतत्समानाधिक
रणमित्यर्थेन कोपि दोषः त्यागांकनेश्रयेतितन घाजित्वादिना साध्यं चे — पाककतावच्छेदककोटौ निवेशनेन दानानाव्यक्ति
साध्यकेऽव्याप्तिरतो यद्धर्मपदं प्रकृतसाध्यतावच्छेदकरूपविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय विशिष्टाधिकरण
तायर्भसामानाधिकरण्यप्रवेश्यामित्येतल्लाभायाश्रयपदमुपेक्ष्यावच्छिन्नपदं धूमादिसामानाधिकरण्यस्यापि मेयत्वादिना
वत्त्यादिसामानाधिकरण्यव्यापकतयातिप्रसंग इति ताद्रूप्यसमानाधिकरण्यत्वे व्यापकतावच्छेदकत्वपर्यंत्यानुधावनं
साधनसामानाधिकरण्यव्यापकत्वं साधनतावच्छेदकविशिष्टसामानाधिकरण्यत्वावच्छिन्नं प्रतिव्यापकत्वेन न धूमादिसा
मानाधिकरण्यत्वेन तद्व्यत्यादिसामानाधिकरण्यत्वावच्छिन्नप्रतिव्यापकत्वेपि गुणत्वादिकसाधनविशिष्टसत्त्वात्वाश्र
यसामानाधिकरण्यत्वावच्छिन्नं प्रतिद्रव्यत्वादिसामानाधिकरण्यत्वेनाव्यापकत्वे च न दूषणमिति परिष्कारस्यावश्यापेक्षणीयं
त्वे पदवैयर्थ्यापाऽलघोऽकृतत्वं साधनाश्रयाश्रितसाध्यसंबंधस्य व्यापकत्वद्रूपकृत्तत्त्वं पदार्थं मन्तर्भाव्य प्रकार एवोचितः स च
सिद्धान्तग्रंथ एव करिष्यत इत्याह इत्योपीति तथा चेदानीं यथाश्रुतार्थं दूषणपर एव मूलग्रन्थ इति नासंगतिरिति भावः मू
लोक्तसिद्धांतलक्षणे तत्त्वोऽन्याभावस्याव्याप्यवृत्तितामते द्रव्यनिष्ठसंयोगाभावोपि प्रतियोगिनधिकरणीभूतद्रव्याधिकरणवृ
त्तिरिति संयोगी द्रव्यत्वादित्यादावव्याप्त्या दूषयित्वा साधनसमानाधिकरणधर्मकान्तत्वविशेषणपदमेव दापयति कारेणेत्यव
लंबनीयः अभाववदर्थकं विनापदमप्रसमस्यंतमित्याह येन व्याचष्टे साध्याभाववती साधिना साध्याभाववदवृत्तित्वमिति प्र
थमलक्षणे साध्याभाववदवृत्तिभेदो विवक्षितत्त्वेन त्वासत्ताभाव इति पद इति भावः सत्तावान् जातेरित्यादौ साध्याभाववति

हेतुतावच्छेदकसंबंधेन न्यूनेत्युक्तेस्तत्त्वाव्याप्तिरतो भिन्नाभावमन्यथान्यच्चेष्टे साध्यविनाऽभाव इति तथा च नन्यूनव्याप्यासंका
र्यं इति भावः तथा च तिनाशादृयोऽभाव एव न तत्तज्ज्ञानं तस्य च निपातार्थेन यावत्प्रयुक्तत्वसंबंधेन भावे साक्षादेवास्वयः प्रयु
क्तत्वं च व्यापकत्वमेवेत्याशयेनाह साध्याभावव्यापको नि साध्यस्य समयोगादि संबंधेन नत्वदीप व्याप्तिवत्तो व्याचष्टे सामानाधिक
रण्यमिति मूले व्यभिचारिणि संबंधस्येति भिचारिनिष्ठान्तरीय संबंधस्येत्यर्थः केनाचित्सह व्याप्तित्वादित्यत्रान्यदीयव्याप्तित्वं
प्रतीयते तच्च न संभवतीत्याचष्टे किंचिद्रूपेति तथा च रूपान्तरावच्छिन्नव्याप्तित्वादित्यर्थः तदेव दर्शयति धूमादेरव्या
तिव्यापकत्वात्तव्याप्तिनिरूपकत्वात् तथा च वह्न्यादौ धूमादिव्याप्तिविशिष्टैवेति भावः मूले तद्बोधादिति केवलासाध्यसामानाधि
करण्ये प्रकारकहेतुमत्ताज्ञानादित्यर्थः अनुमित्युदयादिति अनुमित्युदयोपगमासंभवादित्यर्थः तथा सति द्रव्यत्वा
दिहेतुकादावव्याप्तेनीचेत्याद्यनुमानापत्तेः उदाहरणेवीप्सितत्वयत्वदप्रयोगवैयर्थ्यापत्तेः व्यभिचारस्य हेत्वाभासत्वानु
पपत्तेः सर्वत्र मेयत्वादिना सत्प्रतिपक्षापत्तेश्चेति भावः नतु व्यभिचारज्ञानाभावः साक्षादेवानुपपत्तेः सर्वत्र मेयत्वादिना
सत्प्रतिपक्षापत्तेश्चेति भावः साक्षादेवानुमिति हेतुर्वाच्यः तथा च साध्याभावव्यभिचारिमेयत्वादेर्न सत्प्रतिपक्षताप्रकर
त्वप्रसंगः नवा व्यभिचारस्य हेत्वाभासत्वानुपपत्तिः व्यभिचारशंकानिवर्त्तते नैव उदाहरणेवीप्सोपयोग इत्याशंकते दीधितौ
नवेति तद्बोधः साध्यसामानाधिकरण्यप्रकारकहेतुमत्ताबोधः सर्वानुभवसिद्धत्वादिति तथा च तत्रानुमित्यापत्तिरिति भावः
एवं पक्षमते कोटिद्वयसहचरितधर्मद्वयदर्शनादुभयत्र व्यभिचारग्रहे संशयानुमितिप्रसंगो पि दुर्वारः विपरीतकोटिसमाना
धिकरणधर्मवत्ताज्ञानस्याविशिष्टबुद्ध्यविरोधित्वात् अन्यथा साधारणधर्मदर्शनाधीनप्रत्यक्षसंशयस्याप्युच्छेदकप्रसंगात्
व्यभिचारज्ञानाभावहेतुत्वं भवदुक्तिकमपिनेत्याह हेत्वंतरइति द्रव्यत्वादिवह्न्यादिव्यभिचारग्रहदशायां धूमादिलिंगकव
ह्न्याद्यनुमितिप्रसंगादित्यर्थः तथा च तत्साध्यकानुमिते तत्साध्यनिरूपितव्यभिचारग्रहव्यभिचारित्वान्न तत्तद्धेतुतासंभव

गा०
दी०
22

इतिभावः ननुतल्लिंगकतत्साध्यकानुमितित्वस्यतल्लिंगधर्मिकतत्साध्यव्यभिचारज्ञानाभावजन्यतावच्छेदकोत्वोपगमेनायंव्यभिचा
रइत्यतआह तत्रैवचेतिहेतावितिशेषः रूपांतरेणेतिद्रव्यत्वादिप्रकारेणव्यभिचारग्रहेधूमत्वाद्यवच्छिन्नतल्लिंगकानुमित्यनेरित्य
र्थः ननुतद्धर्मावच्छिन्नतल्लिंगकानुमितित्वमेवतद्धर्मावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबध्यतावच्छेदकंवाच्यं तथाच नोक्तदो
षावकाशइत्यतआह हेतुतावच्छेदका ग्रहइतिधूमत्वादिप्रकारेणपक्षधर्मताज्ञानंविनापि अयमालोकोधूमोवेत्यादिसंदेहद
शायांवह्निव्याप्यवानयमिति व्याप्तिमात्रप्रकारेणपक्षधर्मताज्ञानादनुमित्युत्पत्तेरित्यर्थः तथाचतादृशानुमितौव्यभिचारग्र
हप्रतिबध्यतावच्छेदकनिरुक्तधर्मानाक्रांततायामव्यभिचारग्रहस्यकारणतयाआवश्यकत्वेनव्यभिचाराग्रहहेतुत्वेनउक्ता
पिकथयितुमुचितंनचाव्यभिचारस्यकेवलान्वयस्थलेअप्रसिद्ध्याव्यतिरेकिस्थलेपिकेवलान्वयित्वग्रहदशायांदुर्ग्रहतयातत्र
व्यभिचाराज्ञानसहकृतसामानाधिकरण्यज्ञानादेवानुमितिरुपगंतव्येतिवाच्यं स्वसमानाधिकरणाभावप्रतियोगितानवच्छे
दकसाध्यतावच्छेदकवत्त्वरूपस्यसिद्धांतग्रंथनिर्वच्यस्याभिचारस्यसर्वत्रैवग्रहत्वात् साध्यस्यकेवलान्वयित्वग्रहदशायांम
नुमितिमनंगीकुर्वाणेसाध्याभाववद्वृत्तित्वरूपाव्यभिचारज्ञानस्यानुमितिसामान्यहेतुत्वस्वीकारेपिबाधकाभावादितिभावः
ननुहेतुतावच्छेदकाग्रहस्थलेसाध्यसामानाधिकरण्यप्रकारकव्यभिचारग्रहाभावसहितसाध्यसामानाधिकरण्यप्रकारकपक्ष
धर्मताज्ञानादेवानुमितिः संभवतीतितत्रापिअव्यभिचारज्ञानहेतुत्वमसिद्धमपवस्वसमानाधिकरणेत्यादिसिद्धांतग्रंथनिर्वाच्यव्या
प्तिज्ञानस्यहेतुतायांमानाभावादित्यावर्तकतत्राहहेतुतावच्छेदकस्यसाध्यसामानाधिकरण्यधर्मितावच्छेदकविधयाअवश्यंनिवेश
नीयतयाहेतुतावच्छेदकधर्मप्रकारकज्ञानंविनाअनुमितिर्भवत्येवनेत्यतआह विवदंतेवेति केवलान्वय्यनुमानमनुपगंतारोन
व्याः इतिशेषः तथाचसामानाधिकरण्यज्ञानस्यापिहेतुतायैरव्यभिचारज्ञानहेतुतावादिरुपगम्यतेतन्मतापेक्षयाअव्यभि
चारज्ञानस्थलेव्यभिचाराग्रहहेतुताकल्पनतःसामानाधिकरण्यमात्रस्यव्याप्तित्वमन्यमानस्यमतेगौरवाभावेपिसाध्याभाववद

हृन्निवद्रूपव्यभिचारज्ञानहेतुतावादिनवीनमतापेक्षया कारणताद्वयकल्पने गौरवं दुर्वारमेवेति भावः हेतुव्यापकसाध्यसामा
नाधिकरण्यरूपव्याभिज्ञानहेतुतावादिनामसिद्धांतिनामतेपितत्तत्तापेक्षयालाघवमाह व्यभिचारज्ञानेति सिद्धांतिमते व्य
भिचारज्ञानसामानाधिकरण्यज्ञानयोर्न कारणताद्वयं अपितु हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपाव्य॰
भिचारविषयतानिरूपितत्वं साध्यसामानाधिकरण्यज्ञानहेतुतावच्छेदककोटिप्रविष्टसाध्यतावच्छेदकविषयतायां निवेश्य
ते तथा च कारणताया एकत्वाल्लाघवमस्फुटतरमेवेति भावः इदं मन्त्रावधेयं यत्तद्भेदेन समानाधिकरण्यहेतुमताज्ञानहेतुताना
मनंतत्यात्तत्राव्यभिचारविषयतानिवेशोऽनंतस्थलेऽवच्छेदकगौरवं निरुक्तसाध्यतावच्छेदकविषयतानिरूपिताव्यभिचारवि
षयतानिरूपितत्वं अव्यभिचारविषयतायां वा साध्यतावच्छेदकविषयतानिरूपितत्वं निवेश्यतइत्यत्रागमं विना इहेणानंतप
देभेदेनानंतकारणताधिक्यं चेति मन्नाविशेषमनंतर्भाव्य समान्यतत्तल्लिंगकतत्तत्साध्यकानुमितौ न तु लिंगधर्मिकतत्तत्साध्यकव्यभि
चारज्ञानाभावत्वेनैककारणताकल्पनमेव सम्यक् अत्र केचित् व्यभिचारग्रहस्य शरीरं निष्ठमत्यासत्या अन्यनिष्ठमत्यासत्या वा प्र
तिबंधकत्वं न संभवति परपुरप्रवेशस्थले तच्छरीरे अभिव्यक्तस्य व्यभिचारज्ञानसत्त्वेपि अभिभावकत्वादेरनुमितेरुदयात् कायव्यूह
स्थलेपकशरीरावच्छिन्ने आत्मनि व्यभिचारग्रहसत्त्वेपि शरीरांतरावच्छिन्ने तत्रानुमितेरुदयादिति शरीरविशेषावच्छिन्नत्वं निवेश्य
त्मनिष्ठप्रत्यासत्त्या व्यभिचारग्रहस्य प्रतिबंधकता वाच्या तथा च चैत्रमैत्रादिशरीरभेदेन तदभावस्यानंतहेतुतापेक्षया सामा॰
नाधिकरण्यसामानावच्छेदकत्वोभयप्रत्यासत्त्या अवधारकस्य साध्यसमानाधिकरण्यज्ञानहेतुतायामव्यभिचारविषयत्वनि
वेशएव लघीयान् न च समवायसंबंधावच्छिन्नप्रतियोगिताकस्य व्यभिचारग्रहस्य सामानाधिकरण्यसमानावच्छेदकत्वप्र
त्यासत्त्याभावाकारणताकल्पनेनैव सामंजस्यात् तद्धेतुतामतेपि शरीरभेदनिवेशानंतनापत्तीनिवाच्यं तथासति तच्छरीरावच्छेदेन तदा
त्मनि व्यभिचारधीसत्त्वेपि तदात्मनि तदभावस्यात्मावच्छेदेनान्यात्मनि तदभावस्य तच्छरीरावच्छेदेन हृन्नेतच्छरीरावच्छेदेन तदात्म॰

ग०
दू०
23

न्यनुमित्यापत्तेरुर्वीरत्वात् उभयप्रत्यासत्त्यवच्छिन्नैकहेतुतास्थले एककारणव्यक्तेरुभयादिकरणप्रत्यासत्त्येरुभयाधिकरणप्रत्यासत्त्र
कार्येसतिप्रयोजकतया अव्यभिचारविषयकसामानाधिकरण्यज्ञानं यत्र कार्यत्वग्रहस्तत्र तदात्मनि शरीरेण तदवच्छेदेनैव तच्छरीरावच्छे दे
न च परस्य प्रवेशाकर्नत्वात्मनो नरेत्नन्तेतच्छरीरावच्छेदेनैव तदात्मन्यानुमित्यापत्त्यनवकाशः आत्मभेदेन ज्ञानव्यक्तिभेदादिति ज्ञानहेतुतायां
शरीरभेदनिवेशमन्तरेणैवोपपत्तेः स्वीकरणभेदप्याभावव्यक्तिभेदाभावेन व्यभिचारिज्ञानाभावहेतुतामते शरीरभेदनिवेशनं विनातिप्र
संगवारणोपपत्तेरयोगात् न च पदेशावच्छेदेन यदा यदधिकरणे कार्यं तदवच्छेदेन तदव्यवहितपूर्वक्षणे तदधिकरणे कारणमिति
तादृशावच्छेदकीभूतदेशघटितं व्यापकताघटितं कारणत्वं व्यभिचारग्रहे स्वीक्रियते तादृशकारणताश्रयस्य तद्देशावच्छेदेन तदधिक
रणसत्त्वे तद्देशावच्छिन्न तदधिकरणनिष्ठकार्योत्पादे तत्रानुमिति तच्छरीरावच्छेदेन ताघटितकारणत्वं तदात्मनि व्यभिचारग्रहदशायां
तदवच्छेदेन तदात्मनि तदग्रहस्य दुर्लभतया नोक्तातिप्रसंग इति वाच्यं एवमपि यत्र ग्रहशरीरनाशस्यानुपशरीरस्योत्पादस्तद्दशा
यां व्यभिचारग्रहस्तत्र अस्वर्शरीरोत्पादद्वितीयक्षणे तदवच्छेदेनानुमित्यापत्तेः व्यभिचारग्रहहेतुतावादिनां दुर्वारत्वात् तच्छरीरस्य व्य
भिचारग्रहपूर्वकालेऽसत्त्वेन व्यभिचारग्रहानवच्छेदकतया तदवच्छेदेन तदग्रहस्यात्मनि सत्त्वात् न च तदा व्यभिचारग्रह एव न संभवति
शरीरग्रहप्रकारणविरहादित्याशंक्य शरीरस्य अवयवसावधारणचेष्टावत्त्वमात्रस्य च ज्ञानजननौपयिकत्वे शरीरप्रसत्त्वापि तदवयवाव
च्छेदेनैव ज्ञानोत्पत्तिः संभवतीत्याहुः व्यभिचारग्रहस्यानुमितिहेतुतामते अनुमितिसामग्र्याः अधिककरणघटिततया भिन्नविषयक
प्रत्यक्षादौ तत्प्रतिबंधकतायां गौरवमित्यत्र अव्यभिचारग्रहहेतुतामते तत्र संशयान्यत्वप्रवेशे गौरवमाशंक्यते अव्यभिचारनिश्चय
त्वेनेत्यव्यभिचारप्रकारकाव्यभिचारप्रकारकज्ञानत्वेनेत्यर्थः गौरवमिति व्यभिचारग्रहहेतुतामतेन व्यभिचारसंशयस्य प्रति
बंधकत्वेन तत्साधारणव्यभिचारग्रहत्वावच्छिन्नाभावस्यैव हेतुतया व्यभिचारग्रहे संशयभेदानिवेशेन लाघवादिति भावः व्यभिचा
रप्रतिबंधकतामते व्यभिचारज्ञाने निश्चयत्वानिवेशेऽपि उत्तेजकीभूतभ्रमत्वज्ञाने निश्चयत्वस्य निवेशनीयतया गौरवमिति समाध

नेव्यभिचारज्ञानस्येति भ्रमत्वानिश्चयदशायामेवेत्येवकारेण तत्संशयदशायामनुमित्यविरोधित्वव्यवच्छेदः अप्रामाण्यशं
कयानिश्चितस्यापि निश्चितस्यापि विषयस्य संशयोत्पत्तेस्तत्त्वकाकलौकिकस्य निश्चयकार्यकारित्वमात्रं नास्तीति तथा
विधस्य विभिचारग्रहस्य संशयान्तरवदनुमितिप्रतिबन्धकताधीव्यादिति भावः भ्रमत्वेनानिश्चीयमानस्य भ्रमत्वानिश्चयत्वा
वच्छिन्नाभावविशिष्टस्याविरोधित्वाभवत्वाद्वाच्यं भ्रमत्वशंकयामपीति तच्छंकाशंकादितज्ञानस्याविरोध्यप्रकारकस्यापि नि
श्चयकार्यासमर्थत्वादिति भावः अपिकाएतन्निश्चयदशासमुच्चयः भ्रमत्वेनाप्रमाणस्येति भ्रमत्वज्ञानत्वावच्छिन्नाभा
वविशिष्टस्येत्यर्थः एवकारेण तन्निश्चयत्वावच्छिन्नाभाववैशिष्ट्यस्य कारणतावच्छेदकत्वव्यवच्छेदः नवैवेति व्यभिचार
ग्रहहेतुतावादिनएवेत्यर्थः गौरवादिति व्यभिचारविशेष्यकत्वावच्छिन्नाव्यभिचारप्रकारकत्वप्रकारकज्ञानाभावविं
शिष्टव्यभिचाराप्रकारकाव्यभिचारज्ञानत्वापेक्षया व्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वाभावाप्रकार
काव्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वप्रकारकज्ञानत्वावच्छिन्नाभावविशिष्टव्यभिचारज्ञानत्वावच्छि
न्नाभावत्वरूपकारणतावच्छेदकस्य गुरुशरीरत्वात्त्वादिति भावः नच भ्रमत्वज्ञानाशंकादितस्वविषयकभ्रमत्वज्ञानदशाया
मव्यभिचारज्ञानस्यानुमितिजनकतया तदवच्छेदकाभावप्रतियोगिनि भ्रमत्वज्ञाने भ्रमत्वान्तरग्रहाभावविशिष्टत्वेन निवे
शयं तादृशग्रहस्य चानिश्चयत्वेनैवाभावो निवेश्यः भ्रमत्वशंकाखंदितस्यापि परामर्शीयभ्रमत्वग्रहस्य भ्रमत्वसंशयान्तरवदनु
मित्यनुत्पादप्रयोजकत्वादित्यव्यभिचारग्रहहेतुतामते गौरवं व्यभिचारग्रहोत्तेजकभ्रमत्वनिश्चयभ्रमत्वान्तरग्रहस्य सं
यसाधारणतज्ज्ञानत्वेनैवाभावनिवेशादिति वाच्यं अप्रामाण्यग्रहे अप्रामाण्यान्तरग्रहाभावनिवेशे तत्राप्यप्रामाण्यान्तरग्र
हाभावस्यानिवेशनीयतया तत्र भ्रमत्वानिश्चयत्वनिवेशेन नलाघवविरहात् नचावच्छेदककोटिप्रविष्टाप्रामाण्यग्रहधार
णामेकैकं परित्यज्य नियतत्वनिवेशनं उभयमतेसमानं अव्यभिचारग्रहहेतुतामते पुनर्व्यभिचारग्रहे निश्चयत्वनिवेशनमधिक

गः
दूः

२५

मितिवाच्यं अव्यभिचारकाविशिष्टवैशिष्ट्यज्ञानत्वेनैव हेतुतायावच्छेद्यतया तत्संशये च विशिष्टवैशिष्ट्यावगाहित्वानुपगमे
नैवाव्यभिचारसंशयादनुमितिवारणसंभवेत्तदंशेति स्तुयत्वस्यानिवेशनात् अव्यभिचारविषयकज्ञानाप्रामाण्यग्रहे प्रामाण्य
ग्रहसत्वेप्यनुमित्युत्पादानुपगमेनाप्रामाण्यग्रहे प्रामाण्यान्तरदृष्ट्यभावस्य निविशेषणत्वमन्यथाविशेषणानवस्थाप्रसंगा
दित्यापि वदंति गौरवं तेनाव्यभिचारग्रहप्रतिबंधकतामतं दूषयता मत्येषां मतमाह नान्यविधेति हेतुनिष्ठसाध्याभाववद्
वित्वसाध्यतावच्छेदकानिष्ठहेतुसामानाधिकरण्याभावाप्रतियोगितावच्छेदकत्वमादृशप्रतियोगितानिष्ठसाध्यतावच्छेदकावि
च्छिन्नत्वादिरूपवज्ञविधेत्यर्थः यत्किंचिदेकविधव्यभिचारग्रहदशायामवोनुमित्युत्पादस्यानुभविकतया सर्वविधव्यभिचार
ज्ञानस्यैव प्रत्यक्षप्रतिबंधकताया आवश्यकत्वादिति भावः नियतपूर्ववृत्तित्वेन ज्ञायमानानामपीति अव्यभिचारज्ञानहेतुतामतेऽपि
तद्धेतुभूतनतन्नव्यभिचारज्ञानाभावान्नानुमितौ नियतपूर्वमितौ नियतपूर्ववर्तित्वादिति भावः एतेन बजप्तुनत्वयासिद्धिकल्प
नमपेत्यपवधर्मावच्छिन्नेनियतपूर्ववर्तिनासहितेन तत्कल्प्यनपवलाघवमिति धनिनैवरूपमाणैकविधेति केवलान्वयिवं
डनाद्यभाववदवृत्तित्वरूपलक्षणशरीराव्यभिचारेत्यर्थः तादृशव्यभिचारज्ञानस्यापि सर्वविधव्यभिचारग्रहप्रतिबंधत
यानुडनत्येव सकलव्यभिचारज्ञानदशायामनुमितिवारणसंभवात् अव्यभिचारांतरापेक्षया तच्छरीरलाघवस्यैव विनिग
मकतया च विनिगमनाविरहेण नानाविधाव्यव्यभिचारधियामेव कारणत्वमित्यस्यापि वक्तुमशक्यत्वादिति भावः अज
दितिस्वरसोऽज्ञावनंतद्बीजंतु समानप्रकारतया व्यभिचारांतरग्रहस्य साक्षादज्ञाव्यभिचारज्ञानाप्रतिबंधकतया व्यभिचारांतर
धीदशायांऽज्ञाव्यभिचारज्ञानसत्वेऽनुमितिस्वीकारेऽतुशरीरव्यभिचारांतरग्रहस्यानुमितिविरोधिताया भवतैवोपेदितत्वा
दस्माकमपि लघुशरीरसाध्याभाववदवृत्तित्वरूपव्यभिचारग्रहाभाव एव हेतुरिति वक्तुं शक्यतयाऽज्ञलाघवानवकाशः व्य
भिचारांतरग्रहदशायामज्ञोऽव्यभिचारग्रहाभावसत्वेऽनुमित्युत्पादोऽनुभवसिद्ध इति चेन्नहि अव्यभिचारग्रहाभावत्वएवतदनुत्ता

दोऽनुभवसिद्ध इत्युक्तास्याद्दीपकलिकेव जागर्ति किमेतावता प्रयासेनेति ननु केवलसामानाधिकरण्यस्य व्याप्तित्वे द्रव्यत्वा
दिना ह्रदादौ वह्निसामानाधिपतिरेव व्यापिकातद्वारणाय वरं साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्यैवानुमिति
हेतुतानुपपत्तौ किं त्वव्यभिचारज्ञानहेतुतया ह्रदादौ वह्निशून्यतया वह्निसामानाधिकरण्यविशिष्टवैशिष्ट्यसत्त्वात् व्य
भिचारित्वेऽपि साध्यसामानाधिकरण्यविशिष्टस्य साध्यवत्येव सत्त्वात् पक्षे विशिष्टस्य हेतौ व्यभिचारस्य हेत्वनुमितिर्विशिष्टैवं
सामानाधिकरण्यविशिष्टहेतुवैशिष्ट्यस्याव्यभिचारिवैशिष्ट्यतुल्यत्वादित्याशङ्कां परिहरति सामानाधिकरण्यविशिष्टप्रत्यय
मित्वं स्यादिति पक्षे साध्यसामानाधिकरण्यविशिष्टवैशिष्ट्यादित्यर्थः पक्षे साध्यग्रहं विना साध्यनिश्चयं विनाऽप्यग्रहं दुर्निश्चयं साध्य
संदेहदशायां सामानाधिकरण्यविशिष्टस्यापि संदेह औत्सर्गिकः स साध्यनिश्चयेन व्यावर्तकधर्मदर्शनविधया निवर्तनीय इ
तिभावः तथा चान्योन्याश्रयतया सामानाधिकरण्यविशिष्टवैशिष्ट्यनिश्चयस्य तन्निश्चयहेतुता न संभवतीत्याशयः पर्वते वह्निसं
संदेहदशायां निश्चितसाध्यकमहानसादिवृत्तितया गृह्यमाणायां पर्वतीयधूमव्यक्तौ वह्निसामानाधिकरण्यसंदेह औत्सर्गि
क इति इदानीं तत्सामानाधिकरण्योपलक्षितधूमवता निश्चयोऽदुर्घट इति कथमव्यभिचारिनसाध्यसामानाधिकरण्यप्रकारकहे
तुमत्ताज्ञानहेतुतापक्ष एव प्रतिकार इति महानसीयधूमादौ प्रसृतत्वाद्वह्निसामानाधिकरण्ये निश्चीयमाने लाघवज्ञानाधी
न धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चयस्तथा विशेषदर्शनं तत्तद्व्यक्त्यवच्छेदेनैव तन्निर्णयात् धूमत्वदर्शनविषयपक्षीयधूमेऽपि सा
ध्यसामानाधिकरण्यसंशयायोगात् धूमव्यापकसामानाधिकरण्यवृत्तिनोपलक्षितधूमत्वस्य व्याप्तितापक्षे तत्प्रकारहेतुत्वस्य
पक्षे साध्यसंदेहदशायामपि निश्चयस्यानिःप्रत्यूहतयोपपत्त्यनवकाशाच्च साध्यस्य केवलान्वयित्वज्ञानकालीनायामनुमितौ
केवलान्वयिसाध्यसामानाधिकरण्यज्ञानमतादृशं च साध्यवत्तया वृत्तित्वज्ञानं हेतोरिति मते साध्यवत्तया किंचित्व्यक्तिभि
न्नवृत्तौ नानाधिकरणकसाध्यकहेतौ अव्याप्तिरूपलोकासाध्यवदन्यत्वस्य साध्यतावच्छेदकविशिष्टावच्छिन्नभेदरूपत्वेन सा

ग० ९ अनवकाशात् स्वयंसिद्धांतमनापेक्ष्य गौरवेणनत्रिराकरोति केवलान्वयित्वेतिसाध्य इति अत्रापिस्वत्रयमेवेतिसाध्यसा
मानाधिकरण्यमात्रग्रहस्यव्यभिचारग्रहाविरोधित्वादितिभावः तद्ग्रहोपिसाध्येकेवलान्वयित्वग्रहोपिवाच्यं हेतुर्वाच्यः
यद्यपिस्वमतेअत्यन्ताभावस्यगगनादेःस्वभावाभावत्वविरहादसेनाभावेवृत्तिमत्त्वमातिवेशेपिवतदभावसाधारणंकेवलान्वयित्वंदु
र्वचंतथापिसांप्रदायिकानुमतेतद्घटितकेवलान्वयित्वधीरेहेतौसाधनवत्यात्रस्यविशेषणत्वोपगमेनैवव्यापकतापर्य
वसानेभवतिस्वमतेपुनरत्यन्ताभावांशेसाध्यवनत् वृत्तित्वविशेषणंप्रक्षेप्यैवेतिसांप्रदायिकानुमतमेवकेवलान्वयित्वंदर्शय
त्वदर्शयतितच्चहेतिमूलस्यनेनितिप्रादिपवान्निकृष्टस्यतादृशाभावाप्रतियोगितानवच्छेदकधर्मवत्त्वस्यपरिग्रहः अन्योन्याभाव
घटितव्यापकतापर्यवसानायतद्घटितमपिकेवलान्वयित्वमाहान्योन्याभावेतिगगनादेः स्वात्यंताभावप्रतियोगित्वाद्बुधे
नतदभावत्वदवीकारेपितद्वदन्योन्याभाववत्त्वमप्रमाणिकमित्यन्योन्याभावेवृत्तिमत्त्वमव्यावर्तकतयानोपात्तं सर्वसाधार
णप्रसाध्येव्यतिरेकित्वग्रहकालीनानुमितिकारणीभूतज्ञानविषयत्व वाहाय लाघवात् साध्यवदन्यावृत्तित्वज्ञानस्यहे
तुत्वंनतत्कल्पनालाघवात् साधनेतिसाधनवतो ऽत्यंताभावेविशेषणीभूतायांवृत्तौसाधनवद्वृत्तितायांअन्योन्याभावस्यवावि
शेषत्वमुचितं तथाचउच्यतइत्यादिनावक्ष्यमाणसिद्धांतमतएवपर्यवसानंअन्यथाकार्यकारणभावकल्पनागौरवप्रसंगा
दित्यर्थः शेषमितिसाध्येकेवलान्वयित्वग्रहदशायांतस्यपक्षेतमितावपितदानींकेवलान्वयित्वेनहेतुनासाध्यपक्ष
कपक्षवृत्तित्वानुमित्यैवपक्षेसाध्यवत्तानिश्चयसंभवात् तथाच साध्यवदन्यावृत्तिमेवानुमित्यापिपिकलकशरीरत्वादित्य
र्थः ॥ श्रीमन्नदनंदनायनमः ॥ व्याप्तिपूर्वपक्षोयंसंपूर्णः ॥ ॥